योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य पूर्वार्धम्)/सर्गः ००३

तृतीयः सर्गः ३

श्रीवसिष्ठ उवाच ।

भाविभूरितरङ्गाणां पयोवृन्दमिवाम्बुधौ ।

या चिद्वहत्यनन्तानि जगन्त्यनघ सो भवान् ।। १

भव भावनया मुक्तो भावाभावविवर्जितः ।

चिदात्मन्संस्थिताः केव वद ते वासनादयः ।। २

जीवोऽयं वासनादीदमिति चित्कचति स्वतः ।

इतरोक्त्यर्थयोरत्र कः प्रसङ्गोऽङ्ग कथ्यताम् ।। ३

महातरङ्गगम्भीरभासुरात्मचिदर्णवः ।

रामाभिधोर्मिस्तिमितः समसौम्योऽसि व्योमवत् ।। ४

यथा न भिन्नमनलादौष्ण्यं सौगन्ध्यमम्बुजात् ।

कार्ष्ण्यं कज्जलतः शौक्ल्यं हिमान्माधुर्यमिक्षुतः ।। ५

आलोकश्च प्रकाशाङ्गादनुभूतिस्तथा चितेः ।

जलाद्वीचिर्यथाऽभिन्ना चित्स्वभावात्तथा जगत् ।। ६

चितो न भिन्नोऽनुभवो भिन्नो नानुभवादहम् ।

न मत्तो भिद्यते जीवो न जीवाद्भिद्यते मनः ।। ७

मनसो नेन्द्रियं भिन्नं पृथग्देहश्च नेन्द्रियात् ।

न शरीराज्जगद्भिन्नं जगतो नान्यदस्ति हि ।। ८

एवं प्रवर्तितमिदं महच्चक्रमिदं चिरम् ।

नच प्रवर्तितं किंचिन्न च शीघ्रं च नो चिरम् ।। ९

स्ववेदनमनन्तं च सर्वमेवमखण्डितम् ।

विद्यते व्योमनि व्योम न कस्मिंश्चिन्न किंचन ।। १०

शून्यं शून्ये समुच्छूनं ब्रह्म ब्रह्मणि बृंहितम् ।
सत्यं विजृम्भते सत्ये पूर्णे पूर्णमिव स्थितम् ।। ११
रूपालोकमनस्कारान्कुर्वन्नपि न किंचन ।
ज्ञः करोत्यनुपादेयान्न ज्ञस्यैव हि कर्तृता ।। १२
यदुपादेयबुद्ध्या च तद्दुःखाय सुखाय ते ।
भावाभावेन नादेयमकर्तृ सुखदुःखयोः ।। १३
यथा नानाप्यनानैव खं खे खानीति वाग्गणः ।
सार्थकोऽप्यतिशून्यात्मा तथात्मजगतोः क्रमः ।। १४
अन्तर्व्योमामलो बाह्ये सम्यगाचारचञ्चुरः ।
हर्षामर्षविकारेषु काष्ठलोष्टसमस्थितिः ।। १५
य एवातितरां शत्रुः सत्वरं मारणोद्यतः ।
तमेवाकृत्रिमं मित्रं यः पश्यति स पश्यति ।। १६
समूलकाषं कषति नदीतट इव द्रुमम् ।
यः सौहृदं मत्सरं च स हर्षामर्षदोषहा ।। १७
रागद्वेषविकाराणां स्वरूपं चेन्न भाव्यते ।
ततः सन्तोऽप्यसद्रूपाः सेविता अप्यसेविताः ।। १८
यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमाँल्लोकान्न हन्ति न निबध्यते ।। १९
यन्नास्ति तस्य सद्भावप्रतिपत्तिरुदाहृता ।
मायेति सा परिज्ञानादेव नश्यत्यसंशयम् ।। २०
निःस्नेहदीपवच्छान्तो यस्यान्तर्वासनाभरः ।
तेन चित्रकृतेनेव जितं ज्ञेनाविकारिणा ।। २१
यस्यानुपादेयमिदं समस्तं
पदार्थजातं सदसद्दशासु ।
न दुःखदाहाय सुखाय नैव
विमुक्त एवेह सजीव एव ।। २२

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये देव० मोक्षोपायेषु निर्वाणप्रकरणे पू० ब्रह्मैक्यप्रतिपादनं नाम तृतीयः सर्गः ।। ३ ।।